**तिन्तिडीद्यूत** न० तिन्तिड्या तद्वीजेन द्यूतम् । तिन्तिडी-वीजेन क्रीडने (काँदवोजेरखेला) त्रिका० ।

**तिन्तिड़ि(लि)का** स्त्री तिन्तिड़ी+स्वार्थे क ह्रस्वः वा डस्य लः । (तेँतुल) तिन्तिड्याम् शब्दमा० । काभावे तिन्ति-लीत्यप्यत्र ।

**तिन्दिश** पु० ढिण्डिशवृक्षे (ढाँड़श) राजनि० ।

**तिन्दु** पु० तिज—कु—मृगय्वादि० नि० । (तेँदु)१ख्याते वृक्षे संज्ञायां कन् । तिन्दुक (गाव)इति ख्याते २वृक्षे पुंस्त्री शब्दरत्ना०। स्त्रीत्वे गौ० ङीष् । ३कर्षमाणे वैद्यकपरिभाषा पुंन० । "स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु । पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु । तत्सारं तु भवेद् हृद्यं कर्षलं चिररोगजित् । विषतिन्दुकमप्येवं विशेषात् ग्राहि शीतलम्" राजनि० ।

**तिन्दुकि** स्त्री तिन्दुकी+पृषो० ह्रस्वः । तिन्दुके वृक्षे शब्दर०

**तिन्दुकिनी** स्त्री तिन्दुकस्तदाकारः फलेऽस्त्यस्या इनि ङीप् । आवर्त्तक्याम् राजनि० ८२८ दृश्यम् ।

**तिन्दुल** पु०तिन्दुक+पृषो० कस्य लः । तिन्दुकवृक्षे शब्दर०

**तिप** क्षरणे भ्वा० आत्म० सक० सेट् । तेपते अतेपिष्ट अतिप्त । तितिपे । ऋदित् अतितेपत्-त । [तितेम ।

**तिम** आर्द्रीभावे भ्वा० पर० अक० सेट् । तेमति अतेमीत् ।

**तिम** आर्द्रीकरणे दिवा०पर० सक० सेट् । तिम्यति अतेमीत् । तितेम । "वानरान् तिम्यतोऽवलोक्य" हितो० "तिमितास्त्वभवन् सर्वे तत्र ते हरियूथपाः" रामा० सुन्द० १ स० । "नद्यश्च तिमितोदकाः" रामा० अर० ५४स०। तेमनम् ।

**तिमि** पु० तिम—इन्—तम—इन्—इच्च वा । १समुद्रे त्रिका० । तद्भवे २मत्स्यभेदे पुंस्त्री० स्त्रियां वा ङीप् । "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः" भरतधृतवाक्यम् । "अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति लक्ष्मण" शब्दार्थचि०धृतरामा० वाक्यम् । "असौ शिरोभिस्तिमयः सरन्ध्रैरूर्द्ध्वं वितन्वन्ति जलप्रवाहान्" रघुः ।"अत्र नानाविधाकारास्तिमयोनैकरूपिणः" भा० उ० ९८ अ० । शब्दकल्पद्रुमेऽस्य स्त्रीत्वोक्तिः प्रमादिकी असौ तिमय इति नैकरूपिण इति पुंस्त्वेव प्रयोगात् कृदिकारान्तत्वात् वा स्त्रियां ङीप् । २तज्जातिस्त्रियां स्त्री भेदः ।

**तिमिकोष** पु० तिमेः कोष इव । समुद्रे त्रिका० ।

**तिमिङ्गिल** पु० गिरति—गॄ—मूलवि० क रस्य लः "गिलेऽगिलस्य" पा०मुम् । महामत्स्यभेदे । तिमिशब्दे उदा०दृश्यम् । "तिमिङ्गिलाः कच्छपाश्च तथा तिमितिमिङ्गिलाः"भा०व० १६६ अ० ।

**तिमिङ्गिलगिल** पु० तिमिङ्गिलं गिलति गॄ—मूल० क रस्य लः अगिलस्येति पर्युदासात् न मुम् । अतिवृहन्मत्स्यभेदे तिमिशब्दे उदा० ।

**तिमिङ्गिलाशन** पु०तिमिङ्गिलो मत्स्यः अश्यते यत्र अश—आधारे ल्युट् । दक्षिणस्थे देशभेदे "बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशनाभद्राः" वृ०स० १४अ० कूर्मविभागे दक्षिणस्यदेशोक्तौ । सोऽभिजनोऽस्य तस्य राजा वा अण् । तस्य बहुषु लुक् । २तद्देशवासिषु ३तद्भूपेषु च ब० व०। एकवचने तु तैमिङ्गिलाशन इति भेदः ।

**तिमिज** न० तिमितो जायते जन—ड ५त० । मुक्ताभेदे "तिमिजं मत्स्याक्षिनिभं वृहत्पवित्रं बहुगुणञ्च" वृ०स० ८१ अ० । मुक्ताभेदकथने ।

**तिमित** त्रि० तिम—कर्त्तरि क्त । १निश्चले, धरणी । २क्लिन्ने (भिजे) अमरः । "हृद इव तिमिनागसंवृतः स्तिमितजलोर्मिरिवाशङ्कशर्करः"रामा० अयो० ८१ स० ।

**तिमिर** पुंन०तिम—किरच् अर्द्धर्चा० । १अन्धकारे २नेत्ररोगभेदे च । "तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः । रुणद्धि सर्वतो दृष्टिं लिङ्गनाशमतःपरम्" माधवः अक्षिपटलशब्दे ४२पृ० दृश्यम् । "सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः"। "पतिते घनतिमिरमुषि" माघः ।

**तिमिरनुद्** पु० तिमिरं नुदति खण्डयति नुद—क्विप् ६त०। सूर्य्ये "तिमिरनुदो मण्डलं यदि स वेढ़ः" वृ०स०५अ०। तिमिरभिदादयोऽप्यत्र । २अन्धकारनाशके त्रि० ।

**तिमिररिपु** पु० ६त० । १सूर्य्ये हला० । तिमिरारिप्रभृतयोऽप्यत्र "तिमिरारिस्तमोहन्ति प्रातःस्वस्वभीरवः । वयं काका वयं काका इति जल्पन्ति वायसाः" उद्भटः । २अन्धकारनाशके त्रि० ।

**तिमिरि** पु० तिमीति शब्दं वाचकत्वेन राति रा—बा० डि । तिमिमत्स्ये राजनि० ।

**तिमिष** पु०तिम—इषक् ।१आम्यकर्कट्याम्, त्रिका० २नाटाम्रे च शब्दार्थचि० । [स्त्रियाम् ।

**तिरश्ची** स्त्री तिर्य्यक् जातिः स्त्री ङीप् । पशुपक्षिणां

**तिरश्चीन** त्रि० तिर्य्यगेव स्वार्थे ख । तिर्य्यग्भूते । "गतं तिरश्चीनमनूरुसारथेः" माघः "तिरश्चीनो वितत